श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नक्षत्रसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ नक्षत्रसूक्तम् ॥

अ॒ग्निर्नः॑ पातु॒ कृत्ति॑काः।
नक्ष॑त्रं दे॒वमि॑न्द्रि॒यम्।
इ॒दमा॑सां विचक्ष॒णम्।
ह॒विरा॒सं जु॑होतन।
यस्य॒ भान्ति॑ र॒श्मयो॒ यस्य॑ के॒तवः॑।
यस्ये॒मा विश्वा॒ भुव॑नानि॒ सर्वा᳚।
सकृत्ति॑काभिर॒भि सं॒वसा॑नः।
अ॒ग्निर्नो॑ दे॒वस्सु॑वि॒ते द॑धातु॥ **1** ॥

प्र॒जाप॑ते रोहि॒णी वे॑तु॒ पत्नी᳚।
वि॒श्वरू॑पा बृह॒ती चि॒त्रभा॑नुः।
सा नो॑ य॒ज्ञस्य॑ सुवि॒ते द॑धातु।
यथा॒ जीवे॑म श॒रद॒स्सवी॑राः।
रो॒हि॒णी दे॒व्युद॑गात्पु॒रस्ता᳚त्।
विश्वा॑रू॒पाणि॑ प्रति॒मोद॑माना।
प्र॒जाप॑तिग्ं ह॒विषा॑ व॒र्धय॑न्ती।
प्रि॒या दे॒वाना॒मुप॑यातु य॒ज्ञम्॥ **2** ॥

सोमो राजा मृगशीर्षेण आगन्।
शिवं नक्षत्रं प्रियमस्य धाम।
आप्यायमानो बहुधा जनेषु।
रेतः प्रजां यजमाने दधातु।
यत्ते नक्षत्रं मृगशीर्षमस्ति।
प्रियग्ं राजन् प्रियतमं प्रियाणाम्।
तस्मै ते सोम हविषा विधेम।
शं न एधि द्विपदे शं चतुष्पदे॥ **3**॥

आर्द्रया रुद्रः प्रथमान एति।
श्रेष्ठो देवानां पतिरघ्नियानाम्।
नक्षत्रमस्य हविषा विधेम।
मा नः प्रजाग्ं रीरिषन्मोत वीरान्।
हेती रुद्रस्य परिणो वृणक्तु।
आर्द्रा नक्षत्रं जुषताग्ं हविर्नः।
प्रमुञ्चमानौ दुरितानि विश्वा।
अपाघशग्ं सन्नुदतामरातिम्॥ **4**॥

पुनर्नो देव्यदितिस्पृणोतु।
पुनर्वसू नः पुनरेतां यज्ञम्।
पुनर्नो देवा अभियन्तु सर्वे।
पुनः पुनर्वो हविषा यजामः।

एवा न देव्यदितिरनर्वा।
विश्वस्य भर्त्री जगतः प्रतिष्ठा।
पुनर्वसू हविषा वर्धयन्ती।
प्रियं देवानामप्येतु पाथः॥ **5**॥

बृहस्पतिः प्रथमं जायमानः।
तिष्यं नक्षत्रमभि संबभूव।
श्रेष्ठो देवानां पृतनासु जिष्णुः।
दिशोऽनु सर्वा अभयं नो अस्तु।
तिष्यः पुरस्तादुत मध्यतो नः।
बृहस्पतिर्नः परिपातु पश्चात्।
बाधेतां द्वेषो अभयं कृणुताम्।
सुवीर्यस्य पतयः स्याम॥ **6**॥

इदग्ं सर्पेभ्यो हविरस्तु जुष्टम्।
आश्रेषा येषामनुयन्ति चेतः।
ये अन्तरिक्षं पृथिवीं क्षियन्ति।
ते नः सर्पासो हवमागमिष्ठाः।
ये रोचने सूर्यस्यापि सर्पाः।
ये दिवं देवीमनु सञ्चरन्ति।
येषामाश्रेषा अनुयन्ति कामम्।
तेभ्यः सर्पेभ्यो मधुमज्जुहोमि॥ **7**॥

उप॑हूताः पि॒तरो॒ ये म॒घासु॑।
मनो॑जवसः सु॒कृत॑ः सुकृ॒त्याः।
ते नो॒ नक्ष॑त्रे॒ हव॒माग॑मिष्ठाः।
स्व॒धाभि॑र्य॒ज्ञं प्रय॑तं जुषन्ताम्।
ये अ॑ग्निद॒ग्धा येऽन॑ग्निदग्धाः।
ये॑ऽमुं लो॒कं पि॒तर॑ः क्षि॒यन्ति॑।
याग्श्च॑ वि॒द्मयाग्ं उ॑ च॒ न प्र॑वि॒द्म।
म॒घासु॑ य॒ज्ञग्ं सुकृ॑तं जुषन्ताम्॥ **8**॥

गवा॒ं पति॒ः फल्गु॑नीनामसि॒ त्वम्।
तद॑र्यमन्वरुण मित्र॒चारु॑।
तं त्वा॑ व॒यग्ं स॑नि॒तारग्ं॑ सनी॒नाम्।
जी॒वा जीव॑न्त॒मुप॒ संवि॑शेम।
येने॒मा विश्वा॒ भुव॑नानि॒ सञ्जि॑ता।
यस्य॑ दे॒वा अ॑नुसं॒यन्ति॒ चेत॑ः।
अ॒र्य॒मा राजा॒ऽजर॒स्तुवि॑ष्मान्।
फल्गु॑नीनामृष॒भो रो॑रवीति॥ **9**॥

श्रेष्ठो॑ दे॒वाना᳚ं भगवो भगासि।
तत्त्वा॑ विदु॒ः फल्गु॑नी॒स्तस्य॑ वित्तात्।
अ॒स्मभ्य॑ं क्ष॒त्रम॒जरग्ं॑ सु॒वीर्य᳚म्।
गोम॒दश्व॑व॒दुप॒ सन्नु॑दे॒ह।

भगो॑ ह दा॒ता भग॒ इत्प्र॑दा॒ता।
भगो॑ दे॒वीः फल्गु॑नी॒रावि॑वेश।
भग॒स्येत्तं प्र॑स॒वं ग॑मेम।
यत्र॑ दे॒वैः स॑ध॒माद॑ मदेम॥ **10**॥

आया॑तु दे॒वः स॑वि॒तोप॑यातु।
हि॒र॒ण्ययेन सु॒वृता॒ रथे॑न।
वह॒न् हस्त॑ग्ं सु॒भग॑ं विद्म॒नाप॑सम्।
प्र॒यच्छ॑न्तं॒ पपु॑रिं॒ पुण्य॒मच्छ॑।
हस्तः॒ प्रय॑च्छत्व॒मृतं॒ वसी॑यः।
दक्षि॑णेन॒ प्रति॑गृभ्णीम एनत्।
दा॒तार॑म॒द्य स॑वि॒ता वि॑देय।
यो नो॒ हस्ता॑य प्रसु॒वाति॑ य॒ज्ञम्॥ **11**॥

त्वष्टा॒ नक्ष॑त्रम॒भ्येति॑ चि॒त्राम्।
सु॒भग्ं स॑संयु॒व॒तिग्ं रोच॑मानाम्।
नि॒वे॒शय॑न्न॒मृता॒न्मर्त्या॑ग्ंश्च।
रू॒पाणि॑ पि॒ग्ं॒शन्भुव॑नानि॒ विश्वा॑ँ।
तन्न॒स्त्वष्टा॒ तदु॑ चि॒त्रा विच॑ष्टाम्।
तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य॑ँम्।
तन्नः॑ प्र॒जां वी॒रव॑तीग्ं सनोतु।
गोभि॑र्नो॒ अश्वै॒ः सम॑नक्तु य॒ज्ञम्॥ **12**॥

वा॒युर्नक्ष॑त्रम॒भ्ये॑ति॒ निष्ट्या᳚म्।
ति॒ग्मशृ॑ङ्गो वृष॒भो रोरु॑वाणः।
स॒मी॒रय॒न्भुव॑ना मात॒रिश्वा᳚।
अप॒ द्वेषाग्ं॑सि नुदता॒मरा॑तीः।
तन्नो॑ वा॒युस्तदु॒ निष्ट्या॑ शृणोतु।
तन्नक्ष॑त्रं भूरि॒दा अ॑स्तु॒ मह्य᳚म्।
तन्नो॑ दे॒वासो॒ अनु॑जानन्तु॒ काम᳚म्।
यथा॒ तरे॑म दुरि॒तानि॒ विश्वा᳚॥ **13**॥

दू॒रम॒स्मच्छत्र॑वो यन्तु भी॒ताः।
तदि॑न्द्रा॒ग्नी कृ॑णुतां॒ तद्विशा॑खे।
तन्नो॑ दे॒वा अनु॑मदन्तु य॒ज्ञम्।
प॒श्चात्पु॒रस्ता॒दभ॑यं नो अस्तु।
नक्ष॑त्राणा॒मधि॑पत्नी॒ विशा॑खे।
श्रेष्ठा॑विन्द्रा॒ग्नी भुव॑नस्य गो॒पौ।
विषू॑चः॒ शत्रू॑नप॒बाध॑मानौ।
अप॒क्षुधं॑ नुदता॒मरा॑तिम्॥ **14**॥

पू॒र्णा प॒श्चादु॒त पू॒र्णा पु॒रस्ता᳚त्।
उन्म॑ध्य॒तः पौ᳚र्णमा॒सी जि॑गाय।
तस्यां᳚ दे॒वा अधि॑ सं॒वस॑न्तः।
उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्ताम्।

पृथ्वी सु॒वर्चा॑ युव॒तिः स॒जोषाः᳚।
पौ॒र्ण॒मा॒स्युद॑गा॒च्छोभ॑माना।
आ॒प्या॒यय॑न्ती दुरि॒तानि॒ विश्वा᳚।
उ॒रुं दुहां॒ यज॑मानाय य॒ज्ञम्॥ **15**॥

ऋ॒द्ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑।
मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु।
अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धय॑न्तः।
श॒तं जी॑वेम श॒रदः॒ सवी॑राः।
चि॒त्रं नक्ष॑त्र॒मुद॑गात्पु॒रस्ता᳚त्।
अ॒नू॒रा॒धास॒ इति॒ यद्वद॑न्ति।
तन्मि॒त्र ए॑ति प॒थिभि॑र्देव॒यानैः᳚।
हि॒र॒ण्ययै॒र्वित॑तैर॒न्तरि॑क्षे॥ **16**॥

इन्द्रो᳚ ज्ये॒ष्ठामनु॒ नक्ष॑त्रमेति।
यस्मि॑न् वृ॒त्रं वृ॑त्र॒तूर्ये॑ त॒तार॑।
तस्मि॑न्व॒यम॒मृतं॒ दुहा॑नाः।
क्षुधं॑ तरेम॒ दुरि॑तिं॒ दुरि॑ष्टिम्।
पु॒र॒न्द॒राय॑ वृष॒भाय॑ धृ॒ष्णवे᳚।
अषा॑ढाय॒ सह॑मानाय मी॒ढुषे᳚।
इन्द्रा॑य ज्ये॒ष्ठा मधु॑म॒द्दुहा॑ना।
उ॒रुं कृ॑णोतु॒ यज॑मानाय लो॒कम्॥ **17**॥

मूलं प्रजां वीरवंतीं विदेय।
पराँच्येतु निर्ऋतिः पराचा।
गोभिर्नक्षंत्रं पशुभिः समंक्तम्।
अहंर्भूयाद्यजंमानाय मह्यँम्।
अहंर्नो अद्य संविते दंधातु।
मूलं नक्षंत्रमिति यद्वदंन्ति।
परांचीं वाचा निर्ऋतिं नुदामि।
शिवं प्रजायै शिवमंस्तु मह्यँम्॥ **18**॥

या दिव्या आपः पयंसा सम्बभूवुः।
या अन्तरिंक्ष उत पार्थिवीर्याः।
यासांमषाढा अंनुयन्ति कामँम्।
ता न आपश्शग्ग् स्योना भंवन्तु।
याश्च कूप्या याश्चं नाद्याँः समुद्रियाँः।
याश्चं वैशन्तीरुत प्रांसचीर्याः।
यासांमषाढा मधुं भक्षयंन्ति।
ता न आपश्शग्ग् स्योना भंवन्तु॥ **19**॥

तन्नो विश्वे उपंश्रृण्वन्तु देवाः।
तदंषाढा अभिसंयंन्तु यज्ञम्।
तन्नक्षंत्रं प्रथतां पशुभ्यंः।
कृषिर्वृष्टिर्यजंमानाय कल्पताम्।

शुभ्राः कन्या युवतयः सुपेशसः।
कर्मकृतः सुकृतो वीर्यावतीः।
विश्वान्देवान् हविषा वर्धयन्तीः।
अषाढाः काममुपयान्तु यज्ञम्॥ **20**॥

यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्।
अमुं च लोकमिदमूच सर्वम्।
तन्नो नक्षत्रमभिजिद्विजित्य।
श्रियं दधात्वहृणीयमानम्।
उभौ लोकौ ब्रह्मणा सञ्जितेमौ।
तन्नो नक्षत्रमभिजिद्विचष्टाम्।
तस्मिन्वयं पृतनाः सं जयेम।
तन्नो देवासो अनुजानन्तु कामम्॥ **21**॥

शृण्वन्ति श्रोणाममृतस्य गोपाम्।
पुण्यामस्या उपशृणोमि वाचम्।
महीं देवीं विष्णुपत्नीमजूर्याम्।
प्रतीचीं मेनाग् हविषा यजामः।
त्रेधा विष्णुरुरुगायो विचक्रमे।
महीं दिवं पृथिवीमन्तरिक्षम्।
तच्छ्रोणैति श्रव इच्छमाना।
पुण्यग्ग् श्लोकं यजमानाय कृण्वती॥ **22**॥

अ॒ष्टौ दे॒वा वस॑व॒स्सो॒म्यास॑ः।
चत॑स्रो दे॒वीर॒जरा॒ः श्रवि॑ष्ठाः।
ते य॒ज्ञं पा॑न्तु रज॑सः पु॒रस्ता॑त्।
सं॒व॒थ्स॒रीण॑म॒मृतग्ं॑ स्व॒स्ति।
य॒ज्ञं न॑ः पान्तु॒ वस॑वः पु॒रस्ता॑त्।
द॒क्षि॒ण॒तो॑ऽभिय॑न्तु॒ श्रवि॑ष्ठाः।
पुण्य॒ं नक्ष॑त्रम॒भि संवि॑शाम।
मा नो॒ अरा॑तिर॒घश॒ग्ं॒ साऽग॑न्॥ **23**॥

क्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः।
नक्ष॑त्राणाग्ं श॒तभि॑ष॒ग्वसि॑ष्ठः।
तौ दे॒वेभ्य॑ः कृणुतो दी॒र्घमायु॑ः।
श॒तग्ं स॒हस्रा॑ भेष॒जानि॑ धत्तः।
य॒ज्ञं नो॒ राजा॒ वरु॑ण॒ उप॑यातु।
तन्नो॒ विश्वे॑ अ॒भिसंय॑न्तु दे॒वाः।
तन्नो॒ नक्ष॑त्रग्ं श॒तभि॑षग्जुषा॒णम्।
दी॒र्घमायु॒ः प्रति॑रद्भेष॒जानि॑॥ **24**॥

अ॒ज एक॑पा॒दुद॑गात्पु॒रस्ता॑त्।
विश्वा॑ भू॒तानि॑ प्रति॒मोद॑मानः।
तस्य॑ दे॒वाः प्र॑स॒वं य॑न्ति॒ सर्वे॑।
प्रो॒ष्ठ॒प॒दासो॑ अ॒मृत॑स्य गो॒पाः।

वि॒भ्राज॑मानः समिधा॒न उ॒ग्रः।
आऽन्तरि॑क्षमरुह॒दग॒न्द्याम्।
तग्ं सूर्यं॑ दे॒वम॒जमेक॑पादम्।
प्रो॒ष्ठ॒प॒दासो॒ अनु॑यन्ति॒ सर्वे᳚॥ **25**॥

अहि॑र्बु॑ध्निय॒ः प्रथ॑मान एति।
श्रेष्ठो॑ दे॒वाना॑मु॒त मानु॑षाणाम्।
तं ब्रा᳚ह्म॒णाः सो॑म॒पाः सो॒म्यासः॑।
प्रो॒ष्ठ॒प॒दासो॑ अ॒भिर॑क्षन्ति॒ सर्वे᳚।
च॒त्वार॒ एक॑म॒भि कर्म॑ दे॒वाः।
प्रो॒ष्ठ॒प॒दास॒ इति॒यान् वद॑न्ति।
ते बु॒ध्निय॑ं परि॒षद्यग्ग्ं स्तु॒वन्तः॑।
अहि॑ग्ं रक्षन्ति॒ नम॑सोप॒सद्य॑॥ **26**॥

पू॒षा रे॒वत्यन्वे॑ति॒ पन्था᳚म्।
पु॒ष्टि॒पती॑ पशु॒पा वाज॑बस्त्यौ।
इ॒मानि॑ ह॒व्या प्रय॑ता जुषा॒णा।
सु॒गैर्नो॒ यानै॒रुप॑यातां य॒ज्ञम्।
क्षु॒द्रान्प॒शून्र॑क्षतु रे॒वती॑ नः।
गावो॑ नो॒ अश्वा॒ग्ं॒ अन्वे॑तु पू॒षा।
अन्न॒ग्ं॒ रक्ष॑न्तौ बहु॒धा विरू॑पम्।
वाज॑ग्ं सनु॒तां यज॑मानाय य॒ज्ञम्॥ **27**॥

तद॒श्विना॑वश्व॒युजोप॑याताम्।
शुभ॒ं गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः॑।
स्वं नक्ष॑त्रग्ं ह॒विषा॒ यज॑न्तौ।
मध्वा॒ सम्पृ॑क्तौ॒ यजु॑षा॒ सम॑क्तौ।
यौ दे॒वाना॒ꣳ भि॒षजौ॑ हव्यवा॒हौ।
विश्व॑स्य दू॒ताव॒मृत॑स्य गो॒पौ।
तौ नक्ष॑त्रं जुजुषा॒णोप॑याताम्।
नमो॒ऽश्विभ्या॒ꣳ कृणुमोऽश्व॒युग्भ्या॑म्॥ **28**॥

अप॑ पा॒प्मान॒ं भर॑णीर्भरन्तु।
तद्य॒मो राजा॒ भग॑वा॒न् विच॑ष्टाम्।
लो॒कस्य॒ राजा॑ मह॒तो म॒हान् हि।
सु॒गं न॒ः पन्था॒मभ॑यं कृणोतु।
यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा॑।
यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः।
तद॑स्य चि॒त्रग्ं ह॒विषा॑ यजाम।
अप॑ पा॒प्मान॒ं भर॑णीर्भरन्तु॥ **29**॥

नि॒वेश॑नी स॒ङ्गम॑नी॒ वसू॑ना॒ं
विश्वा॑ रू॒पाणि॒ वसू॑न्यावे॒शय॑न्ती।
स॒ह॒स्र॒पो॒षग्ं सु॒भगा॒ ररा॑णा॒
सा न॒ आग॒न्वर्च॑सा संविदा॒ना।

यत्ते॑ दे॒वा अद॑धुर्भाग॒धेय॒ममा॑वास्ये
सं॒वस॑न्तो महि॒त्वा।
सा नो॑ य॒ज्ञं पि॑पृहि विश्ववारे
र॒यिं नो॑ धेहि सुभगे सु॒वीर॒म्॥ **30** ॥

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

**॥ इति नक्षत्रसूक्तं समाप्तम् ॥**